# Murali Nadadhara Stotram

# મુરલીનાદધારાસ્તોત્રમ્

## Document Information

Text title : muralInAdadhArAstotram

File name : muralInAdadhArAstotram.itx

Category : vishhnu, krishna

Location : doc_vishhnu

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : January 3, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# મુરલીનાદધારાસ્તોત્રમ્

સાન્દ્રામ્ભોધરનીલબાલવપુષા ગોગોપગોપીમનઃ-
    કાન્તઃ કાન્તકરારવિન્દવિલસદ્વંશીવિનોદપ્રિયઃ ।
ગોવિન્દઃ કમનીયપીતવસનઃ ગોપાલબાલાવૃતઃ
    કાલિન્દીતટચારિદિવ્યચરણઃ પાયાદ્યશોદાશિશુઃ ॥ ૧॥

દેયાચ્છ્રેયાંસિ ભૂયાંસ્યખિલજનમનોમોહનાનન્દનાદઃ
    મુગ્ધસ્મેરાસ્યપદ્મારુણશુભકલિકોપાત્તમૈત્રીવિનોદઃ ।
નાનારત્નપ્રદીપ્તો મણિમયવલયાવીતહસ્તાબ્જમધ્યે
    ભ્રાજન્નાલોલતામ્રાઙ્ગુલિમિલિતવપુર્વેણુખણ્ડો મુરારેઃ ॥ ૨॥

પીતં વાસો વસાનઃ મણિમયમકુટાબદ્ધપિઞ્છાવચૂડઃ
    વૃન્દારણ્યે કદમ્બદ્રુમગહનગતસ્સાન્દ્રનીલામ્બુદાભઃ ।
નાનારત્નાંશુચિત્રીકૃતધૃતતપનીયાઙ્ગભૂષાસહસ્રઃ
    સ્મેરાસ્યે સંયુયુક્ષુર્મધુરસમુરલીં પાતુ દેવો મુકુન્દઃ ॥ ૩॥

આલોલારુણપલ્લવાઙ્ગુલિમિલદ્રન્ધ્રો મણિપ્રોજ્જ્વલો
    મર્ત્યામર્ત્યસમાજકર્ષણકરસ્સમ્મોહનો દેહિનામ્ ।
મન્દં મન્દમમન્દમોદસરસપ્રેક્ષાક્ષણોદ્ભાવિતો/ત્થાવિતો
    ભૂયાદસ્મદભીષ્ટપૂરણવિધૌ વેણુર્યદૂનાં પતેઃ ॥ ૪॥

સમ્મૂર્છદ્વેણુનાદામૃતસરસિ સુખં મજ્જતા દેવદૈત્ય-
    મર્ત્યાનાં વા તિરશ્ચાં ત્વમહમિતિ ભિદા લેશલેશોઽપિ કામમ્ ।
નાસીદ્દેહત્રયાદપ્યુપરતમનસસ્સચ્ચિદાનન્દરૂપે
    ભૂમ્નઃ પારે મહિમ્નિ સ્વનિગમશિખરોત્થાર્થબોધાન્નિમગ્નાઃ ॥ ૫॥

શ્લાઘાચઞ્ચલમૌલિના કરલસત્સૌવર્ણવંશીભૃતા
    ગોવિન્દેન સુધાનિધાનમધુરાતામ્રાધરાપૂરિતઃ ।
વેદાન્તામ્બુધિતીરચારિસુજનવ્રાતામિતાનન્દકૃ-
    ન્નાદો ગાનસુધાભિવર્ષિમુરલીખણ્ડોદ્ગતઃ પાતુ વઃ ॥ ૬॥

રમ્યાલોલારુણાઙ્ગુલ્યપિહિતવિવૃતદ્વારવેણુપ્રગીર્ણો
    મૂર્ચ્છત્સપ્તસ્વરશ્રીમિલિતસુમધુરો નાદવેદપ્રઘોષઃ ।
શ્રોતૄણાં ભાગ્યયોગાત્-/પાકાત્પરમગુરુમુખાન્નિર્ગતો લીલયૈવ
    શ્રુત્વૈવાપાકરોતિ પ્રતિભયભવદુર્ગાટવીચારખેદમ્ ॥ ૭॥

આચાર્યાન્નેતિનેતિશ્રુતનિગમશિખાવાક્યસારાનભિજ્ઞઃ
    ભો મર્ત્યા મર્ત્યવર્ગાઃ શ‍ૃણુત સુમધુરં વેણુગાનં મુરારેઃ ।
સ્થૂલં હ્રસ્વં ચ દીર્ઘં મહદણુ યદુત પ્રેક્ષ્યતે યચ્ચ યાવ-
    ન્નૈવૈતત્સર્વમીક્ષાં કુરુત ચ મુરલીનાદપીયૂષમગ્નાન્ ॥ ૮॥

માયામર્ત્યસ્ય માયામધુમયમુરલીગાનલીનાશયાનાં
    માયાપાશોપશાન્ત્યા જગદિદમખિલં ભાતિ સાન્દ્રપ્રમોદમ્ ।
ન ત્વં મેને ન વાહં ન મમ ન ચ તવેત્યસ્તસર્વપ્રપઞ્ચાઃ
    શ્રુત્વૈવાખણ્ડસચ્ચિત્સુખપરમહસિ પ્રાપુરૈક્યાપરોક્ષ્યમ્ ॥ ૯॥

જાગ્રત્સ્વપ્નસુષુપ્તિભેદકલના બાલ્યાદ્યવસ્થાસ્તથા
    વર્ણાદ્યાશ્રમભેદબોધવિષયાઃ પુંસ્ત્રીવિવેકોઽપિ વા ।
અન્યે ચાપિ ભિદાસ્તદા ન હિ બભુર્વંશીમુખાનર્ગલા
    મન્દાનન્દનિધાનનાદજલધૌ મગ્ના યદા માનવાઃ ॥ ૧૦॥

ગ્રાવાણોઽપિ દ્રવન્તિ પ્રવહતિ ન નદી નૈવ વાયુશ્ચ વાતિ
    સિંહો નૈવાભિહન્તિ દ્વિપવરમિભરાડ્યોગચર્યાં તનોતિ ।
માતાપત્યં ન વેત્તિ પ્રિયમિતિ ગૃહિણી નન્દનશ્ચાપિ તાતં
    બિમ્બોષ્ઠાશ્લિષ્ટવંશીસ્રવદમૃતરવે માયિના ગીયમાને ॥ ૧૧॥

નાદાન્તાન્તર્ગતં યત્પરમમહદિતિ પ્રોચ્યતે યોગિવૃન્દૈઃ
    વેદાન્તાન્તર્ગતૈશ્ચ સ્વમહાતવચનૈઃ સ્ફોરિતં યદ્ધ્યણીયઃ ।
વાદાન્તાવિષ્કૃતં તત્સદિતિ ચિદિતિ ચાનન્દ ઇત્યભ્યુપેતં
    નાદં તે નન્દસૂનો મુરલિનિગદિતં કિં કદાઽઽકર્ણયામિ ॥ ૧૨॥

દૈત્યાસ્સન્ત્રસ્તચિત્તાસ્સુરમુનિનિકરાઃ કૌતુકાર્દ્રાન્તરઙ્ગાઃ
    સેન્દ્રા દેવાઃ પ્રમોદામૃતજલનિલયે મગ્નભાવાઃ પ્રકામમ્ ।
સિદ્ધાસ્સાધ્યાશ્ચ સિદ્ધિં પરમમિવ ગતા માનુષા મર્ત્યભાવા-
    પેતાઃ કૃષ્ણસ્ય વંશીનિનદસમાકર્ણનાદેવ ચાસન્ ॥ ૧૩॥

ધ્યાયેત્કલ્પદ્રુમૂલે નવઘનસુભગં ભાનુકોટિપ્રકાશં

અમ્ભોજાક્ષં રતીશાયુતલલિતતમં બર્હિબર્હાવતંસમ્ ।
વ્યત્યસ્તાઙ્ઘ્રિવિનોદાત્કરધૃતમુરલીં ન્યસ્ય બિમ્બાધરોષ્ઠે
લીલાબાલં ત્રિભઙ્ગ્યા વિલસિતવપુષં નાદધારાભિવર્ષમ્ ॥ ૧૪॥

વામાંસાલમ્બિરત્નોજ્જ્વલમકરલસત્કુણ્ડલઃ કુઞ્ચિતોષ્ઠ-
પ્રોદ્યન્મન્દાનિલેન સ્વનિગમમુરલીં પૂરયન્ મન્દમન્દમ્ ।
ઉન્નદ્ધભ્રૂવિલાસસ્ફુરદુરુકરુણાપાઙ્ગધારાભિવર્ષી
નાદાલાપાનુખેલચ્ચલમકુટતટઃ પાતુ પીતામ્બરો નઃ ॥ ૧૫॥

ગોવિન્દો મિત્રવૃન્દૈઃ પરિવૃત ઉષસિ પ્રસ્થિતસ્સુન્દરેણ
વેષેણાભૂષિતસ્સન્કુતુકિતમનસા ઘોષયન્ શ◌ૃઙ્ગમુચ્ચૈઃ ।
ગોવૃન્દં કાલયન્ શ્રીયદુકુલતિલકઃ કાનને ગોપગોભિ-
રાવીતો ગીતવેણુર્વિતરતુ સકલં ચિન્તિતાર્થં મુકુન્દઃ ॥ ૧૬॥

રૂપે યસ્ય ત્વનન્તે નદજલધિનદીકૂપવાપીગિરીન્દ્ર-
ગ્રામગ્રામીણપુર્યાદ્યચરચરગણા વૃન્દશઃ પ્રાદુરાસન્ ।
તત્સર્વં સંહૃતં ચ પ્રિયતમવપુષા મોદબોધં પ્રયચ્છ-
ન્નેવં વંશીનિનાદેઽપ્યભવદિહ ભિદા શાન્તવિશ્વસ્વરૂપમ્ ॥ ૧૭॥

વિશ્વેશે વિશ્વરૂપં કલયતિ વિજયે પશ્યતિ સ્વાભિપક્ષં
વિશ્વાધીશસ્ય વક્ત્રં વિશદથ સભયં પ્રાપ્તબોધો વ્યરંસત્ ।
તસ્માજ્જાતાનિ જીવન્ત્યપિ પરમહસા યત્પ્રયન્તીતિ ભૂમ-
ગીતો બોધો ય આસીત્સ હિ મુરલિકયા ગીત એવાભવત્પ્રાક્ ॥ ૧૮॥

સારથ્યં પાણ્ડવસ્ય સ્વચરણશરણસ્યાચરન્નાજિભૂમૌ
સારં સ્વં શાત્રવં ચાકલયતિ નિતરાં ફલ્ગુને સ્યન્દનસ્થે ।
સારમ્ભાન્ બન્ધુમિત્રપ્રિયગુરુનિવહાન્ વીક્ષ્ય ચાપે  નિરસ્તે
સારં બોધાય યોઽદાત્સ ગુરુરિહ મુદે ગીતવાન્ વેણુનાદમ્ ॥ ૧૯॥

પાર્થસ્યાપાર્થભાવપ્રશમનમિષતસ્સાત્વતાનાં શરણ્યઃ
પાર્થક્યં પાર્થિવશ્રીમદકૃતમિતિ યદ્બોધયામાસ ગીતામ્ ।
પાર્થ ત્વં કર્મમાત્રં કુરુ ફલવિષયે મુઞ્ચ ચિન્તાં દુરન્તાં
પાર્થપ્રેષ્ઠો યદૂચે તદનુ ચ ગદિતં વેણુગાનેન પૂર્વમ્ ॥ ૨૦॥

નિત્યો મુક્તોઽમૃતોઽયં પરશિવસુખચિચ્છાશ્વતો વા પુરાણઃ
આત્મા તસ્માચ્છરીરે હતિમુપલભતે નૈવ ચાહન્યમાને ।
તદ્ધિત્વા જીર્ણવસ્ત્રં નવમિવપુરુષો દેહમન્યદ્બિભર્તિ

કો મોહસ્તત્ર શોકઃ વિજય ઇતીવાહ વેણુપ્રણાદઃ ॥ ૨૧॥

ગોપીમણ્ડલમણ્ડનો મુરલિકાં પાણિદ્વયેનોન્નમન્
આતામ્રાધરબિમ્બમન્દમરુતા મન્દં મુદા પૂરયન્ ।
ગોપીચન્દનકલ્પિતોર્ધ્વતિલકં વક્ત્રં સમુદ્યોતયન્
પાયાલ્લોકમમન્દમોદજલધાવામજ્જયન્ કેશવઃ ॥ ૨૨॥

વંશીનાદે મુરારેર્વનભુવિ મધુરે મૂર્ચ્છતિ શ્રોત્રયુગ્મં
કર્તું પદ્મોદ્ભવસ્ય શ્રમમતિવિતથં મન્યતે સર્વલોકઃ ।
સ્વં સ્વં કર્તવ્યમર્થં ઝટિતિ ચ વિગણય્યૈવ તત્રૈવ લીનો
લગ્નશ્ચિત્રે યદાસીદિવ ચ નિગમવાગ્ભાતયોગપ્રતિષ્ઠઃ ॥ ૨૩॥

નાદારોહાવરોહૈર્મધુરિપુમુરલીપ્રોત્થિતૈઃ કાલચક્રે
ભ્રામ્યજ્જીવવ્રજસ્ય પ્રતરણવિધયે યોગ એવોપદિષ્ટઃ ।
ગાનારૂઢસ્ય નસ્તો જનિમૃતિદુરિતે પશ્યતાશેષજીવાઃ
બ્રહ્મપ્રાપ્તો વિમૃત્યુઃ કિલ ભવતિ યથા તત્ત્વમસ્યાદિ વાક્યાત્ ॥ ૨૪॥

આલાપારોહવીચીચલદુરુશિખરાન્મન્દમન્દાવરોહ-
ભઙ્ગ્યા નિષ્યન્દમાને યદુપતિવદનાદ્વેણુનાદામૃતોદે ।
તાપાત્તીરે પયોધેર્વિહરણશરણાસ્તત્તરઙ્ગાર્દ્રવાત-
સિક્તા હૃષ્ટા યથાત્રાપ્યપરિમિતસુખાસ્તાપમુક્તા ભવન્તિ ॥ ૨૫॥

પીયૂષાસ્વાદલોલે દિવિ સુરનિકરે મોદમગ્ને મુનીન્દ્રે
વીણાગાનૈકલીલે સુરવરગણિકામણ્ડલે નૃત્યતિ દ્રાક્ ।
ઉદ્યુક્તે સ્વસ્વકર્મણ્યચરચરગણે ગીયમાનો મનોજ્ઞ-
નાદોઽતાનીત્સમેષામ્મધુરિપુમુરલીક્વાણઘોષાન્તરાયમ્ ॥ ૨૬॥

વિક્ષિપ્યાશેષહૈમામૃતભૃતચષકાન્યમ્બરસ્થાસ્સુરૌઘા
નિશ્ચેષ્ટાધ્વસ્તવીણસ્સ ખલુ સુરમુનિઃ શ્લાઘયા મૌલિકમ્પી ।
ચિત્રારબ્ધા ઇવાસન્ કુતુકિતહૃદયાદેવવધ્વો મુરારિ-
કાન્તાતામ્રાધરોષ્ઠાર્પિતમધુમુરલીમોહનાલાપમગ્નાઃ ॥ ૨૭॥

કેલીલોલે કદાચિન્મરકતમણિસચ્છાયકાયે નિશીથે
નિદ્રાઽઽક્રાન્તે જનૌઘે શશિસુભગતમે યામુને સૈકતે ચ ।
દેવે પદ્માસનસ્થે કરયુગલસમુન્નીતવેણુપ્રકાણ્ડ-
ગાનસ્વાનપ્રબુદ્ધાસ્સુરનરનિકરાઃ પાદમાપુઃ પરસ્ય ॥ ૨૮॥

વેદૈર્વેદ્યોઽહમેવિપ્યખિલજનમનસ્સન્નિવિષ્ટઃ શ્રુતીના-
    મૂર્ધ્ના કર્તાવબોદ્ધા પ્રકૃતિગુણગણાસઙ્ગશુદ્ધોઽથ નિત્યઃ ।
તન્માં વેદાન્તવીથ્યવિચિનુતહૃદયે સાધવસ્સાધનાય
    સ્વાન્તે શાન્ત્યેતિ બોધં દિશતિ હિ ભગવાન્ વેણુવેદોપદેશાત્ ॥ ૨૯॥

સર્વે વેદાઃ પદં યત્પરમમભિવદન્ત્યામુકામાઃ ફલં ય-
    દાસેવન્તે તપાંસિ પ્રિયમિતિ કિમુ વા બ્રહ્મચર્યં ચરન્તિ ।
તત્સત્યં ધામમાત્રાત્રિતયસુવિવૃતબ્રહ્મનાદાખ્યવેદ-
    બીજોદ્ગીથો મુરારેર્મુરલિનિગદિતસ્સિદ્ધિમૃદ્ધાં વિધત્તામ્ ॥ ૩૦॥

ભૂષાદિપ્રેન્દ્રચાપો યદુકુલગિરિભૂર્ભક્તિપૌરસ્ત્યવાત-
    નુન્નો હૈમામ્બરશ્રીક્ષણલસિતવૃતશ્ચારુપિઞ્છાવચૂડઃ ।
શ્રીકૃષ્ણાખ્યા પ્રસિદ્ધઃ કરધૃતમુરલીનાદપીયૂષવર્ષી
    સ્નિગ્ધશ્યામામ્બુવાહઃ કલયતુ કુશલં યોગિકેકિપ્રકર્ષઃ ॥ ૩૧॥

કાન્તં તાતં સુતં વા દુહિતરમથવા  માતરં વાન્યબન્ધૂન્
    એત્યાનન્દેન યુક્તા રુષમથ ચ ગતા વેશ્મધર્મે નિરૂઢાઃ ।
શ્રુત્વા કસ્માત્તુ લીલામનુજમધુરિપોર્વેણુનાદામૃતં તત્
    પાયં પાયં ન તૃપ્તાશ્ચરણમુપગતા ગોપિકાશ્ચક્રપાણેઃ ॥ ૩૨॥

વૃન્દારણ્યે વિહારી સુરનરશરણો  ગોપિકાજીવધાતુ-
    ર્ગોવિન્દાખ્યાપ્રસિદ્ધો વ્રજભુવિ વિલસન્ સુન્દરો નીલમેઘઃ ।
ભક્તાનં કામવર્ષી કનકમયલસચ્ચેલવિદ્યુત્પરીતઃ
    શ્રેયો દદ્યાત્કરાબ્જોદ્ધૃતમુરલિકયા નાદધારાભિવર્ષી ॥ ૩૩॥

મન્દં મન્દમુપેત્ય સુસ્મિતશરત્પૂર્ણેન્દુબિમ્બોલ્લસ-
    દ્વક્ત્રં પ્રોજ્જ્વલચારુરત્નવિરણન્મઞ્જીરપાદામ્બુજમ્ ।
સ્નિગ્ધશ્યામલકોમલાભ્રતુલિતાનઙ્ગાયુતશ્રીધરં
    દેવં હસ્તગૃહીતવેણુશકલં બાલં કદાઽઽલોકયે ॥ ૩૪॥

મા મા મર્ત્ય વિષીદ મામકમિદં રૂપં સમાલોકય
    વીક્ષસ્વામલશારદાખિલશશિપ્રસ્પર્ધિ વક્ત્રં મમ ।
મજ્જાપાઙ્ગકૃપોદકે શ‍ૃણુ રવં મઞ્જીરજં પીયતાં
    વંશીનાદસુધા ચ માધવ કદા મામિત્યહો વક્ષ્યસિ ॥ ૩૫॥

આવિર્ભૂય મમાગ્રતશ્શતસહસ્રાર્કાધિકપ્રોજ્જ્વલઃ
    નીલામ્ભોધરચારુતાહરવપુઃ પીતામ્બરાલઙ્કૃતઃ ।

નાનારત્નવિચિત્રભૂષણધરો વેણું રસાત્કૂજયન્
    ગોપીમણ્ડલમધ્યગો મમ કદા કુર્યાન્મુદં ચક્ષુષોઃ ॥ ૩૬॥

આદૌ ભાણ્ડીરવૃક્ષં તદનુ ચ પરિતો ગોસહસ્રં સખીંશ્ચ
    ગોપાન્ ગોપીશ્ચ મધ્યે યદુકુલતિલકં વૃક્ષમૂલે નિષણ્ણમ્ ।
મેઘશ્યામં શુભાઙ્ગં કરધૃતમુરલીગાનલોલં કૃપાલું
    દીનં માં સાન્ત્વયન્તં જનુષિ મમ કદા નેત્રપાત્રીકરોમિ ॥ ૩૭॥

વામાંસાઞ્ચિતવામકુણ્ડલભરો દભ્રોન્નતભ્રૂલતા-
    રમ્યોદ્ભ્રાન્તસુદીર્ઘપદ્મનયનસુસ્મેરવક્ત્રામ્બુજઃ ।
બર્હાપીડચલચ્છિરાઃ કરસમુન્નીતાર્યવેણું મુદા
    કુઞ્જત્તામ્રશુભાધરાર્પિતપદં ગાયન્ સ પાયાચ્છિશુઃ ॥ ૩૮॥

તેજઃપુઞ્જં પુરસ્તાન્નવઘનવપુષં સર્વભૂષાદિરમ્યં
    વિદ્યુદ્વિદ્યોતિચેલં ભુજધૃતમુરલીં નાદયન્તં સ્મરામિ ।
દેવો દીનાર્તિહન્તા મમ કલુષભરં ભઞ્જયન્નબ્જનાભઃ
    આવિર્ભૂયાત્કદા નુ પ્રણવમયસુધાનાદમોદં વિતન્વન્ ॥ ૩૯॥

શ૰ૃણ્વન્ વંશીનિનાદં નિમિષમિવ નયન્ વાસરાન્ વત્સરાન્ વા
    ગાનાનન્દામૃતાબ્ધાવનુપમસુખદે ગાઢજાતાવગાહઃ ।
વિસ્મૃત્યાશેષલોકાન્ ભવવિપિનગતિં તાપવર્ગં ચ  હિત્વા
    પાદં દામોદરસ્ય ધ્રુવશિશુવિષયં પ્રાપ્નુયાં ભાગ્યતઃ કિમ્ ॥ ૪૦॥

(કારુણ્યાબ્ધે કથં વા તવ ચરણરતિં પ્રાપ્નુયાં નાથ દીનઃ ॥ ૪૦॥)
અઙ્ઘ્રે મે નિગમાદિકર્તુરનઘે વેદસ્મૃતીશાશ્વતે
    યસ્તૂલ્લઙ્ઘ્ય યથેચ્છમત્ર વિહરત્યાપ્નોતિ ઘોરાં ગતિમ્ ।
ઇત્યુદ્ઘુષ્ય જગત્પરીક્ષણવિધૌ વેણું ક્વણન્નાદરા-
    ન્નાદામગ્નચરાચરં સ ભગવાન્ પશ્યન્નનૃત્યન્મુદા ॥ ૪૧॥

તાત્પર્યં પરમં હિ પાણ્ડવસખે સર્વશ્રુતીનાં મતં
    પારાશર્યવચસ્સુ તત્પ્રતિપદં વિદ્યોતતે સુસ્ફુટમ્ ।
તત્સાક્ષાદિહ કર્તુમાશ્રિતજનત્રાતા સ્વવંશીવરં
    ગાયન્નાદવશીકૃતાખિલજનં પાદાશ્રિતં પ્રૈક્ષત ॥ ૪૨॥

ગાયન્તં વેણુમુચ્ચૈર્વનભુવિ દયિતં વલ્લવીસુન્દરીણા-
    માવીતં નારદાદ્યૈરસુરસુરગણૈસ્સિદ્ધસાધ્યૈશ્ચ નાકે ।
ગોપીગોગોપવૃન્દૈર્વલયિતમતસીગુચ્છસચ્છાયકાયં

માયાબાલં કદા વા નયનયુગમુદાલપ્સ્યસે નન્દસૂનુમ્ ॥ ૪૩॥

રાસેશં રાસગોષ્ઠ્યાં વ્રજકુલયુવતીમન્તરેણાન્તરેણ
નૃત્યન્તં નર્તયન્તં કરધૃતમુરલીં કૂજયન્તં જયન્તમ્ ।
પશ્યેયં ભાગધેયાદ્ભવજલધિમહાદુર્ગપોતં વરેણ્યં
માયાગોપાલબાલં કલરવકલિતાનન્દસાન્દ્રં મુકુન્દમ્ ॥ ૪૪॥

જારં મત્વાપિ ગોપ્યો યદુપતિમુરલીનાદમોદાતિભાર-
સ્તબ્ધાઙ્ગ્યો નન્દસૂનું નવઘનસુભગે બર્હિબર્હાવતંસે ।
સમ્મગ્નાશ્ચારુરૂપે શુચમપિ વિજહુઃ પ્રાપુરૈક્યં પદાબ્જે
તત્સદ્બુદ્ધ્યા પ્રપન્નાઃ કિમુ ચરણતરિં નાપ્નુયુઃ કેશવસ્ય ॥ ૪૫॥

ભક્ત્યા ત્વય્યાદિદેવ વ્રજકુલવનિતાસ્ત્વામબધ્નન્ મહેશ
ત્વદ્ભક્તાગ્રેસરત્વં જગતિ હિ સકલે લેભિરે રાધિકેશ ।
તાદૃક્કારુણ્યસિન્ધો નિરુપમકૃપયા દેવકીભગધેય
દીનં માં પાહિ પાહિ સ્વકરધૃતનદદ્વેણુમન્ત્રોપદેશાત્ ॥ ૪૬॥

કન્દર્પાયુતકોટિકોટિસુભગં પીતામ્બરાલઙ્કૃતં
ગ્રૈવેયાઙ્ગદકઙ્કણાદિલસિતં ચારુક્વણન્નૂપુરમ્ ।
વિસ્મૃત્યાપિ ભવન્તમીશ ભવતસ્તામ્રાધરારોપિત-
શ્રીવેણૂચ્ચરદાર્દ્રનાદલહરીં નો વિસ્મરેયં વિભો ॥ ૪૭॥

મા ગા મા ગા વિષાદં ત્યજ મનસિ ભયં શાન્તિમન્તર્ભજસ્વ
મત્પાદાબ્જં પ્રપન્નો ન હિ ભજતિ જનો દુર્ગતિં તાત સત્યમ્ ।
તત્ત્વં તત્ત્વં મદીયં શૃણુ પરસુખદં મા રુદો મા રુદેતિ
નાદાલાપેન વેણોર્મમ મનસિ કદા મોદમીશો વિદધ્યાત્ ॥ ૪૮॥

શ્રોતવ્યો મન્તુમર્હસ્તદુપરિ નિતરાં ધ્યાનગમ્યશ્ચ વેદે-
ષ્વાત્માવારેતિ મર્ત્યં વિપદિ નિપતિતં પ્રેક્ષ્ય સૂત્રં દયાર્દ્રમ્ ।
તત્ર શ્રોતવ્યમેવ પ્રવરમિતિ યતસ્તત્ત્વબોધો  વિભાતી-
ત્યેવં શ્રીવેણુનાદશ્રુતિધૃતમનસાં કૃષ્ણભક્ત્યા સ્ફુટં હિ ॥ ૪૯॥

શ્રુત્યા શ્રુત્યન્તગીર્ભિર્ભવભયદલને બ્રહ્મવિદ્યૈવ ગમ્યે-
ત્યેવં તાત્પર્યધૃત્યા સ્ફુટતરમપિ યા બોધિતા માધવેન ।
લબ્ધા ચેત્સદ્ગુરોસ્સા વિદધિકશુભદાસ્યાદિતીર્થ્યં જનાના-
મન્તર્બોધાય મોદાત્પરમગુરુરસૌ વેણુનાદં જુઘોષ ॥ ૫૦॥

આત્મારામા મુનીન્દ્રાસ્સતતમનનતશ્છિન્નપાશાઃ પ્રશાન્તાઃ
    નિર્દ્વન્દ્વા અપ્યનન્તે રતિમધિકમુદા તન્વતે ચિત્રમેતત્ ।
તન્મૂલં વન્યમાલાલલિતજલદનીલાભમાયાકિશોર-
    કૂજદ્વેણુપ્રમૂર્ચ્છન્મધુરનિનદિતામગ્રતાં મન્મહે ચ ॥ ૫૧॥

યોગેનાન્તર્નિરુધ્યાનિલમથ યમિનો મોદનાદાનુબન્ધં
    પ્રેષ્ઠં લબ્ધ્વા વિરક્તાઃ પરમહસિ યુતા ઇત્યયં સુપ્રસિદ્ધઃ ।
તાદૃઙ્નાદાનુભાવં સ્થિરચરનિકરપ્રીતયે દાતુકામઃ
    કામાકલ્પાભિરામઃ કલરવમુરલીનાદમોદં વિતેને ॥ ૫૨॥

દાસીપુત્રોઽતિબાલો દ્વિજવરકૃપયા પ્રાપ્તસેવાનુભાવો
    ધ્યાયન્ દેવં મુકુન્દં સકૃદિહ સરસં પ્રૈક્ષતાક્ષ્ણેણ સાક્ષાત્ ।
ભૂયો દ્રષ્ટું સ યત્તો ન હિ પુનરિહ માં દ્રક્ષ્યસીતીરિતોઽથ
    ભૂત્વા વીણામુનીન્દ્રો મુરરિપુમુરલીગાનલોલોઽજનિષ્ઠ ॥ ૫૩॥

નાદાસ્વાદાનુભાવં વિબુધમુનિવરઃ પ્રાપ્તુકામે યશોદા-
    સૂનોશ્છાત્રત્વમાદાવભજત મુરલીગાનમાકર્ણયચ્ચ ।
તત્તત્ત્વાનિશ્ચયેનાકલુષિતહૃદયઃ વીણયા સાધયન્ યઃ
    કાલેનાનન્તલીલારસકથનમહાગાયકત્વં પ્રપેદે ॥ ૫૪॥

અન્તર્ણાદપ્રણાલીપરિચયવિધયે પ્રાગ્યશોદાસુતસ્ય
    વંશીનાદાનુસન્ધામકુરુત સુચિરં નારદશ્છાત્રભાવે ।
આચાર્યસ્યેતિ વેણું કરપરિકલને નાસ્મ્યહં શક્નુયામિ-
    ત્યાચારેણાદરેણ સ્વનિગમદમતં વીણયૈવાજુઘોષ ॥ ૫૫॥

દેવસ્યૈવ પ્રસાદાદખિલજનિમતાં દેશિકેન્દ્રસ્ય કામં
    ત્રૈલોક્યાન્તર્યથેચ્છં વિહરણપરમો વીણયાબોધયચ્ચ ।
વેણોર્નાદપ્રભાવં મુરરિપુગદિતં મર્ત્યવર્ગસ્ય શાન્ત્યૈ
    નાદાન્તે બોધદં ચાકલયત મુરલીહસ્તમિત્યભ્રનીલમ્ ॥ ૫૬॥

સામોદં હસ્તપદ્મોન્નમિતશુભલસત્પક્વબિમ્બાધરોષ્ઠે
    ન્યસ્તશ્રીનાદધાનીમણિમયમુરલીગાનલીલાવિલોલઃ ।
ધામ સ્વં નાદધારાપતિતપરવશપ્રેષ્ઠપાદાશ્રિતાનાં
    જીવાનાં સન્દદાનઃ કરિવરવરદઃ પાતુ દેવો મુકુન્દઃ ॥ ૫૭॥

યદ્વેણુપ્રાણનાદશ્રવણહૃતધિયાં સ્થાવરાણાં ચરાણાં
    નાસીદ્ભેદો ન ચાભૂજ્જનિકૃતવિષમપ્રત્યયો વા તદાત્વે ।

સદ્યસ્તે ધૂતપાપાસ્સકુતુકકરુણાપાઙ્ગધારાભિષિક્તાઃ
    કામં નાદામૃતાદાસ્સતતમપિ તથા ભાવમાવવ્રિરે ચ ॥ ૫૮॥

યદ્યદ્વા મધુસૂદનસ્ય ચરિતમ્માધુર્યધુર્યમ્મતં
    તત્રાપિ પ્રિયમેકમેવ બહુશઃ પ્રેક્ષ્યાપિ વીક્ષામહે ।
યન્માયાશિશુભાવમેત્ય સદયં ગોગોપગોપાઙ્ગનાઃ
    સદ્યઃ શ્રીમુરલીનિનાદવિજિતત્રૈલોક્યબોધં વ્યધાત્ ॥ ૫૯॥

વૃન્દારણ્યસ્થલેષુ પ્રકટિતકપટશ્યામડિમ્ભં કદાચિત્
    ગોવત્સાંશ્ચારયન્તં મધુમથનવિભું ગોપબાલૈર્લલન્તમ્ ।
પ્રેક્ષ્યાજોઽજાવશં તં નિખિલમપિ હરન્નપ્યસૌ સ્વેશશક્ત્યા
    સૃષ્ટ્વા સર્વં પુરેવ સ્વરિતમધુઝરીં વેણુનેશો વવર્ષ ॥ ૬૦॥

અબ્દાન્તે માયિ માયાં સુનિપુણમવલોક્યેશિતુસ્તાં વિભૂતિં
    ધાતાભૂચ્છાન્તદર્પઃસ્વકલિતદુરિતં ક્ષન્તુમીશં યયાચે ।
અસ્તૌદ્વંશીનિનાદામૃતભણિતિસમાકર્ણનાનન્દમગ્નો
    ભૂમ્નસ્તત્પાદપઙ્કેરુહવિરહભિયાનિન્દદાદ્યસ્સ્વધામ ॥ ૬૧॥

કર્મજ્ઞાનેશભક્તિપ્રકરણગહનાપારવેદામ્બુરાશિં
    સ્વેચ્છામન્થાનદણ્ડાવલિતગુણવિદા યત્નહસ્તાગ્ચલેન ।
મથ્નન્ માયાકિશોરાકૃતિરિહ જગતીબાલકસ્યાર્તિશાન્ત્યૈ
    વંશ્યાદાન્નાદવેદામૃતમતિમધુરમ્મોદયન્નાદિદેવઃ ॥ ૬૨॥

પ્રાણાનાયમ્ય સમ્યઙ્નિયમિતમનસા યેગિભિઃ સ્વાદ્યમાનો
    નાદશ્ચાનાહતાખ્યઃ કિમુ સુખદ ઇતિ પ્રાપ્તશઙ્કાકુલાનામ્ ।
વૈશદ્યાયાન્તરં તં નિનદિતમમૃતાસ્વાદવેણુપ્રગીર્ણં
    સમ્મોદાયાજુઘોષ વ્રજભુવિ વિહરન્ કોઽપિ ગોપીમનોજ્ઞઃ ॥ ૬૩॥

વેદો ધર્માર્થકામામૃતપદગમકસ્તત્તદિચ્છાનુરૂપ-
    સારસ્સેવ્યજ્જનાનામિતિ તુ સુવિદિતસ્તદ્વદત્રાપિ મર્ત્યાઃ ।
વેદપ્રોક્તુર્મુરારેર્મુરલિનિનદિતાનન્દનાદાખ્યવેદ-
    સેવાલોલા ભજન્તે ફલમપરિમિતં પાદભક્તિં ચ ભૂમ્નઃ ॥ ૬૪॥

ઓમિત્યેવં પ્રણાદસ્ત્રિવિધનિગમવાક્સારભૂતોજવિષ્ણુ-
    રુદ્રાત્મા લોકરૂપી શ્રુતિમય ઉભયબ્રહ્મરૂપી પ્રસિદ્ધઃ ।
તં નાદં વેણુનાસૌ સરસમનુનદન્ નાદવેદાર્થરૂપી
    તુર્યં સ્વં ધામ ભક્તાન્ પ્રતિનિગમયતિ શ્રીહરિઃ પાદભક્ત્યા ॥ ૬૫॥

ગાનાકૃષ્ટાસ્તદન્તે મધુરસવિરહાત્પાદમૂલં પ્રપન્નાઃ
    ત્વં વૈ સર્વં ત્વદન્યં ન હિ નિખિલગુરો વેદ્મિ માં પાહિ દીનમ્ ।
ઇત્થં નાદાન્તદીપ્તં પરમપિ પુરુષં બોધયિત્વાઞ્જસૈવ
    નાદસ્યોદ્ધારતત્ત્વં સ્ફુટમપિ કલયન્ વાસુદેવો બભાસે ॥ ૬૬॥

શિઞ્જદ્રત્નપ્રદીપ્તપ્રણિપતિતજનાભીતિદાનૈકદક્ષં
    મઞ્જીરં મઞ્જુપાદામ્બુજલસિતતમં તાલદાને નિયુજ્ય ।
દેવો દીનાર્તિહન્તા મમ મનસિ મુદં સ્યન્દયન્ વેણુગાનં
    લીલાલાપપ્રકારં કિમુ મમ પુરતઃ સ્વીકરિષ્યત્યનન્તમ્ ॥ ૬૭॥

આત્મા સચ્ચિત્સુખાત્મા વ્યપગતકલુષદ્વન્દ્વમોહઃ સ્વદીપ્ત્યા
    સર્વં વ્યાપ્યાવતિષ્ઠન્નકૃતકવચનૈર્વેદ્યરૂપો વિભાતિ ।
તં ચાત્માનં રસો વૈ સ ઇતિ રસઘનં યં સમાશ્રિત્ય યાતિ
    ચાનન્દં ચેતિ વેદં નિગમયિતુમસૌ વેણુનાદં જુઘોષ ॥ ૬૮॥

રાકાચન્દ્રાભિરમ્યૈર્નિશિ વિપિનતટે વેણુમુચ્ચૈર્વિનાદ્ય
    સદ્યસ્સંપ્રાપ્તગોપીજનનિવહવૃતસ્તાભિરીશસ્તુ રેમે ।
તાસ્ત્યક્ત્વાન્તર્ધિમાપ પ્રભુરિતિ મહતા શોકભારેણ ગોપ્ય-
    સ્તામ્યન્ત્યસ્તત્તુ નાદં મણિમુરલિભવં શુશ્રુવુઃ શ્રીધરસ્ય ॥ ૬૯॥

શ્રુત્વા નાદં મુરલ્યાઃ ક્વનુ કિલ મુરલીગાનલોલો ભવેદિ-
    ત્યેવં નાદાખ્યતન્ત્યા નિયમિતમતયસ્તત્સમીપં યયુસ્તાઃ ।
યાતાર્યાઃ માત્રવાસં કુરુત કુલવધૂદૂષણં ચેતિ ગોપ-
    બાલોક્તાશ્શોકતાન્તાઃ કલમુરલિરવૈસ્તોષયામાસ તન્વીઃ ॥ ૭૦॥

ચન્દ્ર ત્વં પૂર્ણચન્દ્રપ્રતિભટવદનં હેત(??)માલામલાભં
    કુન્દ ત્વં કુન્દદન્તં નલિનિ તુ નલિનીપત્રનેત્રં ત્વપશ્યઃ ।
એવં ગોપ્યસ્સકામા યદુજલધિશશિં દેવમન્વિષ્ય યાતાઃ
    કાન્ત્યા કન્દર્પતુલ્યં મણિમયમુરલીગાનલોલં સ્વપશ્યન્ ॥ ૭૧॥

શર્વબ્રહ્મેન્દ્રમુખ્યા ગગનભુવિતતા વ્યોમયાનૈર્નિલિમ્પા-
    શ્ચિત્રન્યસ્તા ઇવાસન્ સ્થિરધૃતકરણાઃ કૌતુકાકમ્પિશીર્ષાઃ ।
રાધાકાન્તસ્ય કાન્તસ્વનિતમુરલિકાનાદમાધુર્યસક્ત-
    ચિત્તાશ્શક્તા ન તત્ત્વં સુનિપુણમનુચિન્ત્યાપિ વક્તું ચ વેત્તુમ્ ॥ ૭૨॥

આનન્દોદ્રેકરૂપાન્મધુરસમધુરાદ્ધન્મનોજ્ઞાન્મનોજ્ઞ-

માનન્દં સ્વાદુ હૃદ્યં મધુરિપુમુરલીનાદમાધુર્યધામ ।
નિત્યં સત્યં વિધત્તાં મમ હૃદિ કુતુકં મત્તમત્તેભહન્તા
સ્વાન્તં મે ગાનશૈલીપરિચયવિશદં ચાસ્તુ શાન્તં નિતાન્તમ્ ॥ ૭૩॥

ગાને પીયૂષધારાધિકમધુરતમે સ્યન્દમાને મુકુન્દ-
સેવાહેવાકિદેવપ્રકરમુનિજનાનન્દસન્દહરૂપે ।
કો દેવઃ કો મનુષ્યઃ કિમુ જડમિતરચ્ચેતિ વિભ્રષ્ટભેદ-
ભાવાલ્લીનં યથાભૂદુપરતસકલં યત્પુરાભાસત દ્રાક્ ॥ ૭૪॥

મત્સ્યે દૃષ્ટં ન ચૈતત્સકરુણચરિતે કચ્છપે નૈવ દૃષ્ટં
એવં કોલે નૃસિંહે સુરમુનિવિનુતે વામને નાપિ જાતમ્ ।
રામે રામે ન રામેઽપ્યભવદિહ યદુષ્વેષ કૃષ્ણેતિ નામ્ના
યચ્ચક્રે ચક્રપાણિર્મણિમયમુરલીગાનલીલાવિનોદાત્ ॥ ૭૫॥

ત્રાતું દેવાન્ કમલનયન ત્વં પુરા કલ્પસિન્ધૌ
ધૃત્વા માત્સ્યં વપુરપિ વિભો ચિત્રચર્યાં કૃતોઽસિ ।
કિં ચાપાસ્ત્વં રવિસુતમનું ચાક્ષુષે સમ્પ્લવે ચ
સર્વં ભૂમન્ તવ મુરલિકાનાદધારાસમં કિમ્ ॥ ૭૬॥

ઉદ્ધૃત્ય ક્ષ્માં દિતસુતબલપ્રાપિતાં શ્રીવરાહ-
મૂર્તિં ધૃત્વા જલનિધિતટં પ્રાપ્ય દૈત્યં ચ હત્વા ।
ધાત્રીં યજ્ઞઃ પુનરપિ પુરેવાબ્ધિમધ્યે નિવેશ્ય
યત્કૃત્યં તે નનુ મુરલિકાનાદધારાસમાનમ્ ॥ ૭૭॥

પીયૂષં પ્રાપ્નુકામે દિતિજસુરગણે ક્ષીરપાથોનિધાનં
મથ્નત્યા મગ્નમન્થક્ષિતિધરમધરઃ પૃષ્ઠતઃ કૂર્મમૂર્તિઃ ।
ચિત્રં યત્તત્કૃપાબ્ધે તવ શુભચરિતં શ્યામમૂર્તે તથાપિ
કૃષ્ણસ્સન્ વેણુનાદામૃતરસકલનાચિત્ર તુલ્યં નુ ભાતિ ॥ ૭૮॥

દૈતેયાનામઘં દ્રાક્ શમયિતુમખિલત્રાસ્તિ દેવો મુકુન્દ-
ઇત્યુક્તિં ભક્તવશ્યઃ પદકમલભૃતસ્સત્યમેવાથ કર્તુમ્ ।
ભિત્વા સ્તમ્ભં સભાયાં નરહરિવપુષાભ્યેત્ય દૈત્યં વિદીર્યન્
દેવાંશ્ચાપાદિતીદં ચરિતમપિ વિભો વેણુનાદેઽધમર્ણમ્ ॥ ૭૯॥

ઉપેન્દ્રઃ પ્રાગ્ભૂમિં દિવમથ ચ શીર્ષં સ્વકપદૈ-
સ્ત્રિભિઃ ક્રાન્ત્વા દૈત્યં બલિમથ રુરોધાતલભુવિ ।
પુરા ખર્વઃ પશ્ચાદુરુધૃતશરીરસ્સુરપતિઃ

વ્યધાચ્ચિત્રં વૃત્તં તદનુ મુરલીનાદતુલિતમ્ ॥ ૮૦॥

અયોધ્યાયાં શ્રીમાન્ દશરથસુતો રામ ઇતિ ચ
સ્વયં જાતસ્તાતપ્રકથિતમૃતં કર્તુમટવીમ્ ।
અટન્નબ્ધિં બદ્ધ્વા દશવદનમાજૌ ચ હતવાન્
ચરન્ દેવાભીષ્ટં  તદપિ ન તુલા વેણુવિહૃતેઃ ॥ ૮૧॥

કૃષ્ટે દુશ્શાસનેન દ્રુપદતનુભુવઃ કૌરવાણાં સભાયાં
કેશે કૌશેયકે ચ વ્રજપતિશરણાં કેશવ દ્વારકેશ ।
હા કૃષ્ણેત્યારુદન્તીં સકરુણહૃદયસ્તામનાથામરક્ષઃ
કિં માં દીનં ન પાસિ પ્રિયમધુમુરલીનાદધારામૃતેન ॥ ૮૨॥

યૂથૈર્મોદાત્તટાકં દ્વિરદકુલપતૌ ગાહમાને મહોગ્ર-
ગ્રાહાક્રાન્તેતિ દીને બહુતરમભિયુજ્યાપિ વૈફલ્યભાજિ ।
ત્રાયસ્વાનાથબન્ધો વરદ ઇતિ નદત્યાત્તચક્રોઽથ નક્રં
ભિત્વા રક્ષાં વ્યતાનીઃ કિમુ મમ શરણં વેણુગાનં ન રાસિ ॥ ૮૩॥

કંસપ્રેક્ષ્યાં કદાચિત્તવ સદનગતામિન્દિરાસુન્દરાઙ્ગીં
ડોલાયાં રાજમાનં મરકતવપુષં છદ્મગોપાલબાલમ્ ।
ધૃત્વા સ્તન્યં દિશન્તીમહનદપિ દદૌ યો ગતિં યોગિગમ્યાં
દીને કિં વા કૃપાબ્ધે ન કિરસિ મુરલીનાદધારામૃતોદમ્ ॥ ૮૪॥

આર્તાનામાર્તિશાન્ત્યૈ જગતિ સુવિદિતાભીષ્ટદા નાદધારા
તત્તે હૃદ્યં પદાબ્જં ભવકલુષહરં હે મુરારે ભજેઽહમ્ ।
તન્મહ્યં ક્ષુત્પિપાસાપરવશિતહૃદે દેહિ તે બાલકાય
ક્ષિપ્રં ત્વદ્વેણુનાદામૃતમધુરપયઃપૂરમાનન્દરૂપમ્ ॥ ૮૫॥

કૈશોરે વેણુગીતં સરસમુપનિશમ્યાપિ કાલાતિપાતાત્
પાર્થો નષ્ટસ્મૃતિસ્ત્વાં સુહૃદમથ રણે સ્યન્દનસ્થં હ્યપૃચ્છત્ ।
સર્વં તદ્ગીતિકાર્થં યદુકુલતિલકો બોધયસ્ત્વં હિ સાક્ષાત્
તન્મૂસં વેણુનાદં ક્વનુ કિલ સુકૃતી માધવાકર્ણયેયમ્ ॥ ૮૬॥

માયામર્ત્યસ્ય માયામયચરિતશતેષ્વપ્યસઙ્ખ્યેષુ જાગ્ર-
ત્સ્વત્ર શ્રીગોપનારીજનરમણકૃતં ચિત્રમેતચ્ચરિત્રમ્ ।
તત્રાપિ શ્રીયશોદાસુતવદનમરુત્પૂરિતાનન્દનાદ-
ધારાસારેણ વેણોઃ કલિમલમથનં યચ્ચરિત્રં પવિત્રમ્ ॥ ૮૭॥

માત્રા કાલકલાકલાપવિવૃતેષૂચ્ચાવચત્વં ગતે-
ષૂચ્ચૈસ્તાલલયાદિજાતિવિલસદ્રાગેષુ નૈકેષુ ચ ।
મૂર્ચ્છત્સૂત્સુકદેવકીસુતમુખામ્ભોજોચ્ચરદ્વંશિકા-
નાદાનન્દસુધાઝરીષુ વિહરન્ ધન્યો ભવેયં કિમુ ॥ ૮૮॥

પારાવારાત્પ્રગદ્ભત્તરલતરતરઙ્ગાલિમાલેવ રમ્યો
ભૂયો ભૂયોઽનુગચ્છદ્ગતિલયલલિતોદ્ગીતરાગપ્રકાણ્ડઃ ।
લીલાગોપાલબાલસ્મિતસુભગતમારક્તબિમ્બાધરોષ્ઠ-
ન્યસ્તશ્રીવેણુનાદઃ શ્રવણપુટગતઃ સ્યાદ્યદિ સ્યાં હિ ધન્યઃ ॥ ૮૯॥

નાદાનન્દામૃતોદા નવરસભરિતા રાગકલ્લોલમાલા
માત્રાતાલપ્રપઞ્ચપ્રકટિતવિવિધાવર્તગર્તા મનોજ્ઞા ।
નાદારોહાવરોહક્રમસમવિષમા ગીતિકાબુદ્બુદા ચ
વેણુદ્વારેણ દિવ્યા નિપતતિ તટિની ભૂતયે નઃ કૃપાર્દ્રૈઃ ॥ ૯૦॥

નાદે વંશીસમુત્થે શ્રવણપુટગતે દેવતિર્યઙ્નરાણાં
સિદ્ધાનાં ચારણાનાં સ્થિરચરજગતાં સ્વાન્તપદ્માનિ જગ્મુઃ ।
સર્વં બ્રહ્મેતિ તત્ત્વં ભવસિ ચ મનસો યન્મનશ્ચેતિ તત્ત્વં
મોદાદાલગ્નભાવાઃ પરમહસિ રતા વાસુદેવાભિધાને ॥ ૯૧॥

યચ્છ્રેયઃ શ્રેયસોઽપિ પ્રિયતમવિષયં પ્રેયસોઽપીષ્ટમિષ્ટાત્
કાન્તં કાન્તાન્મૃદિમ્નો મૃદુગુરુગુરુણો યદ્ધ્યણોરપ્યણીયઃ ।
મૂર્ચ્છન્નાભીરયોષિત્પ્રિયશિશુમુરલીમોહનાલાપનાદો
ભૂયાઃ કામાય નઃ સ્યાદભિમતસકલાભીષ્ટદસ્સર્વદાપિ ॥ ૯૨॥

રાકાચન્દ્રસમુજ્જ્વલાચ્છયમુનાતીરે સ ગોપૈર્વૃતઃ
મૂલે નીપતરોર્નવીનજલદશ્યામો મુરારિર્મુદા ।
મન્દ્રં મઞ્જુકરાઙ્ગુલીર્વિવરકેષ્વાલોલયન્ યાદવ-
પ્રાણો મોહનવેણુગાનરસિકઃ પાયાદ્યશોદાશિશુઃ ॥ ૯૩॥

વૃન્દારણ્યે તૃણચરગણાનુદ્રુતશ્શક્રનીલ-
ચ્છાયાદીપ્યન્મદનમદનો નન્દગગોપાલસૂનુઃ ।
વેણું કૂજન્ વનભુવિ ચરન્મુગ્ધગોપાલબાલ-
મિત્રૈર્વીતઃ પ્રહસિતમુખઃ પાતુ વંશીવિનોદઃ ॥ ૯૪॥

ગોપીકામાવતારસ્સુલલિતવિચલન્મૂર્ધનેત્રાભિરામઃ
બિમ્બોષ્ઠન્યસ્તવંશીમધુમધુરગિરા મોદયન્ યોગિવૃન્દમ્ ।

વ્યત્યસ્તાઙ્ઘ્રિર્મુરારિર્વ્રજકુલવનિતામણ્ડલાન્તર્વિલાસા-
    ન્નૃત્યન્નત્યન્તમીશઃ પ્રદિશતુ સકલં મઙ્ગલં ગાનલોલઃ ॥ ૯૫॥

નીપસ્કન્ધં કિસલયસુમવ્રાતસંવીતચારુ-
    કશ્ચિત્સ્થિત્વા સુરપતિમણિશ્યામકામાભિરામઃ ।
હસ્તાબ્જેન સ્વરદસુષિરાન્ છાદયન્નન્યહસ્તે-
    નોષ્ઠપ્રાન્તે પરિચયવતા વેણુના સઞ્ચુકૂજ ॥ ૯૬॥

પર્યાયેણ સ્વયમભિમૃશન્ હસ્તશાખાભિરેવ
    દ્વારાણ્યારાદુપરિ મધુરે ન્યસ્ય બિમ્બાધરોષ્ઠે ।
વેણું ગાયન્ કમલનયનઃ કોઽપિ તાપિઞ્છવર્ણઃ
    કામાન્ દુગ્ધે કલરવસુધાનાદમગ્નાશયાનામ્ ॥ ૯૭॥

વંશીરત્નં નલિનસુભગેનાગ્રહસ્તેન ચારુ
    બિમ્બસ્તમ્ભાહરણમસૃણારજ્યદોષ્ઠે નિધાય ।
દન્તાનીષચ્છશિકરનિભાન્ ભાસયન્નન્તરેણ
    વક્ત્રેન્દુસ્તે જયતિ જગતામ્મોહકસ્તે પ્રગાતુઃ ॥ ૯૮॥

(ગાનારમ્ભે તવ મુખશશી રાજતે મે હૃદબ્જે)
લોકાન્ સન્નાપ્યમિતનિજસન્નાદભૂમ્નામૃતેન
    સિઞ્ચન્ રન્ધ્રાકલિતરુચિરાગ્રાઙ્ગુલીન્યાસમિત્રઃ ।
વક્ત્રાબ્જે તે ભ્રમરસુષમં નૃત્યરઙ્ગે સુનૃત્ય-
    ન્નેત્રદ્વન્દ્વં બહુ વિજયતે લોકતાપાપહારી ॥ ૯૯॥

નાદાક્રાન્તે જગતિ હિ જનસ્સદ્ય એવાતિમોહા-
    દાવિષ્ટાન્તાસ્સમમનુપતન્ત્યર્ભકૈર્દારવર્ગૈઃ ।
ભુક્ત્વા દુક્ત્વા નિરવધિસુખં ભૂય એવાતિતૃપ્તાઃ
    સઙ્કલ્પેનાપ્યવિદિતભિદસ્ત્વાં હિ નાથં ભજન્તે ॥ ૧૦૦॥

આરુહ્યામન્દમોદાત્પ્રસવભરલસન્નીપવૃક્ષં સમન્તા-
    ચ્છીતાંશોરંશુજાલૈર્ધવલિતવિષયે હન્ત દિક્ચક્રવાલે ।
જાતે કસ્માન્નિશીથે જનરવરહિતે શ્યામગમ્ભીરવેષો
    વિશ્વેષામ્મોહનાય શ્રિતકપટનયો વેણુના સઞ્ચુકૂજ ॥ ૧૦૧॥

રાકાખણ્ડેન્દુબિમ્બદ્યુતિહરવદનોલ્લાસિ બિમ્બાધરોષ્ઠે
    મન્દં મન્દં કરેણ પ્રખચિતમણિમદ્વેણુખણ્ડં નિવેશ્ય ।
સાન્દ્રાનન્દામૃતાબ્ધિર્મુખલવમરુતાપૂર્ય સમ્મોહનાખ્યં

રાગં રાગેદ્ધરન્ધ્રાર્પિતકરકલિકો મોહયન્ સન્નનાદ ॥ ૧૦૨॥

ગત્વા વૃન્દાવનાન્તં તરુવરનિબિડં ગોપયોષાવિભૂષાઃ
નીપસ્કન્ધાધિરૂઢં મણિમુરલિધરં બાલગોપાલવેષમ્ ।
નીલાપાઙ્ગૈસ્તરુણ્યસ્સુરપતિમણિસચ્છાયકાયં કિરન્ત્યઃ
પ્રેમ્ણા કન્દર્પદર્પપ્રમથનવપુષઃ પાદપદ્મં પ્રપન્નાઃ ॥ ૧૦૩॥

વેણુદ્વારેષુ સપ્તસ્વવહિતમનસા ચારયન્નઙ્ગુલીનાં
વૃન્દં ગાનામૃતેનત્રભુવનમપિ સમ્મોહયન્ શ્યામધામ ।
ગોપાનાં કામપૂરં ઝટિતિ ચ કલયન્ કમ્પ્રમૂર્ધેક્ષણશ્ચ
જીયાદ્ગોપાલબાલઃ સ્મિતરુચિરમુખો ગોપિકાવૃન્દમધ્યે ॥ ૧૦૪॥

આકર્ણ્યાકાલગીતં મુરલિનિગલિતં છદ્મગોપાલબાલ-
જલ્પં મુગ્ધાઃ પ્રમુગ્ધા  વ્રજકુલવનિતાઃ સમ્ભ્રમાત્ત્યક્તનિદ્રાઃ ।
મુક્ત્વા કાલેઽપિ ગેહં પતિસુતનિકરં સર્વમેવાવશાસ્તા-
સ્સગ્ચેલુર્યત્રવંશીવિલસિતનિપુણશ્યામકામાભિરામઃ ॥ ૧૦૫॥

પ્રેમ્ણા બાલં સ્વકીયં સ્તનકલશયુગસ્યન્દિ દુગ્ધં સુહૃદ્યં
નર્મોક્ત્યા પાયયન્તી પરિચિતમશ ૃણોદ્વિગ્નગાનં સમન્તાત્ ।
જીમૂતધ્વાનનૃત્યચ્છિવિગણ ઇવ ચાત્યન્તમોદાતિભારાત્
પ્રાયાદ્વંશીધરસ્યાન્તિકમતિકુતુકાત્ત્યક્તબાલા તુ કાપિ ॥ ૧૦૬॥

આર્તં કાન્તં હિ કાચિત્પરિચરણપરા ભોજનાદ્યૈઃ પ્રસાદ્ય
શય્યાયાં સ્વાસ્તૃતાયાં શયનવિધિમુખે વેણુગાનં નિશમ્ય ।
સન્ત્યજ્ય દ્રાગુપેતા યદુકુલતિલકસ્યાન્તિકં ગોપકાન્તા
મન્ત્રેણેવાવકૃષ્ટા ફણિકુલવનિતા જાતરાગાવતસ્થે ॥ ૧૦૭॥

કાચિદ્વ્યત્યસ્તવસ્ત્રાભરણસમુદયા વેણુગાનશ્રવેણ
ક્ષિપ્રં ગોપાલબાલાનનશશિસુષમાં દ્રષ્ટુકામા હિ વામા ।
સ્વૈરં યાન્તી લલજ્જે ન હિ પથિ દયિતે શ્યામલે બદ્ધભાવા
દૃષ્ટ્વા કામાભિરામં કલિમલહરણં મોદપૂરે મમજ્જ ॥ ૧૦૮॥

પીઠં પીઠેઽધિરોપ્ય પ્રભુરુપરિ સમારુહ્ય હૈયઙ્ગવીનં
કૃત્સ્નં મૃષ્ટ્વાથ દૃષ્ટાં ત્વરિતમુપગતાં કાઞ્ચિદાભીરનારીમ્ ।
માતઃ કિં શ્રોતુકામા મધુરમુરલિકાનાદસૌભાગ્યધામે-
ત્યુક્ત્વા કોપં તરુણ્યાસ્સરસમપનયન્ પાતુ દેવો હિ ગાયન્ ॥ ૧૦૯॥

ગોવિન્દો ગોપનારીભવનમનુવિશન્ મિત્રગોપાલબાલૈ-
    રાવીતઃ કામવેષઃ કપટશતપટુશ્ચૌરનાટ્યં વિતન્વન્ ।
શિક્યસ્થાદ્રવ્યભાણ્ડાદ્દધિઘૃતનવનીતાદિસર્વં મુષિત્વા
    સન્તૃપ્તસ્તર્પયંશ્ચ સ્વરમયમુરલીમૂર્ચ્છનામાલલાપ ॥ ૧૧૦॥

શ્યામાઙ્ગઃ ક્વાપિ ભાણ્ડં નવનલિનદલસ્પર્ધિનેત્રસ્સમીક્ષ્ય
    પ્રાંશુપ્રાલમ્બિયન્ત્રસ્થિતમથ કુતુકાદ્દણ્ડપાતૈઃ પ્રભિદ્ય ।
તદ્દ્વારોપાન્તધારાનિપતિતમખિલં મિત્રવૃન્દૈઃ પિબન્તં
    ગવ્યં દૃષ્ટ્વા ગતાન્યા સરભસમુરલીગાનલીના વિમૂઢા ॥ ૧૧૧॥

અન્યત્રાનન્દરૂપી દધિઘૃતનવનીતાદિકાલાભરોષ-
    દોષાવિષ્ટો બભઞ્ચાન્તિકનિહિતમસૌ ભાજનાનાં સહસ્રમ્ ।
ક્રોશન્તીં ચોરચોરેત્યભિમુખપતિતાં વીક્ષ્ય કોણે નિલીનઃ
    મુગ્ધાં સદ્યઃ સ વેણુક્વણિતમધુવશાં રાધિકેશો વિતેને ॥ ૧૧૨॥

ધૃત્વા ગોવર્ધનાદ્રિં નવઘનસુભગઃ પદ્મપત્રાયતાક્ષઃ
    સ્વાઙ્ગુલ્યા લીલયૈવ પ્રિયપદશરણાન્ ત્રાતુમેવાનુકમ્પી ।
બાલોઽયં પારયેદ્વા ગિરિમિતિ તમસા દૈન્યભાજાં વિષાદ-
    શાન્ત્યૈ કાન્તાનનેન્દુઃ કલરવમુરલીમુચ્ચકૈરાજુઘોષ ॥ ૧૧૩॥

(કૃત્સ્નં ભાણ્ડાત્પ્રમુષ્ણન્ ત્વરિતમુપગતાં કાઞ્ચિદાલોક્ય ગોપીં)
મુષ્ણન્તં કૃષ્ણમારાત્ત્વરિતમતિરુષા બદ્ધ્ય માતુર્નયન્તી
    સાન્નિદ્ધ્યં માર્ગમધ્યે સુમહતિ સદસિ પ્રેષ્ઠવંશીનિનાદમ્ ।
કૂજન્તં મોદયન્તં સ્થિરચરનિકરં મજ્જયન્તં સુધાબ્ધૌ
    ગાનાખ્યે નન્દભાગ્યં સકુતુકનયના પ્રેક્ષ્ય તસ્થૌ શિલેવ ॥ ૧૧૪॥

ગોપિમણ્ડલમધ્યગોઽતિલલિતસ્તિષ્ઠંસ્ત્રિભઙ્ગ્યા કર-
    પ્રાન્તોન્નીતશુભારુણાધરપુટન્યસ્તા મુદા વંશિકા ।
નાદાનન્દસુધામયીં શ્રુતિસુખાં વૃષ્ટિં સુપુણ્યાત્મનાં
    સંસારાનલતપ્તચિત્તજનતામોદાય વર્ષન્ બભૌ ॥ ૧૧૫॥

ગોપ્યઃ ક્ષીરાદિગવ્યાભૃતકલશચયં શીર્ષ્ણિ કામં વહન્ત્યઃ
    વિક્રેતું વીથિકાસુ પ્રિયવચનશતૈરાલિભિસ્સંવ્રજન્ત્યઃ ।
દૃષ્ટાઃ કૃષ્ણેન મન્દં તરુવરમધિરુહ્યાહૃતે ગવ્યકુમ્ભ-
    સ્તોમે સન્ત્રસ્તગોપીશ્રવણપુટયુગે વેણુનાદં જુઘોષ ॥ ૧૧૬॥

શ્રુત્વા કસ્માન્નિશીથે મુરલિમધુરવં ગાઢનિન્દ્રાપ્રબુદ્ધા

ગન્તું સજ્જાથ રુદ્ધા નિજજનનિવહૈર્વેશ્મનોઽભ્યન્તરાલે ।
ઇચ્છાભઙ્ગાન્નિરીહા હૃદિ ઘનસુભગં ચન્દ્રકોટિપ્રકાશં
ધ્યાયં ધ્યાયં પ્રશાન્તા મધુપતિચરણામ્ભોજસાયુજ્યમાપ ॥ ૧૧૭॥

ગ્રીષ્મે માર્તાણ્ડબિમ્બે તપતિવનભુવિ સ્વોગ્રરશ્મિપ્રતાનૈઃ
ગાવો ગ્લાનિં પ્રયાતા મૃદુતૃણકબલભ્રાન્તભાસ્વન્મરીચ્યઃ ।
તામ્યન્તીસ્તાઃકૃપાર્દ્રસ્તરુવરનિબિડચ્છાયમભ્યેત્ય રમ્ય-
માહ્વાતું વેણુમુચ્ચૈરરણયદનઘો ગોપકન્યાભુજઙ્ગઃ ॥ ૧૧૮॥

નાદે મોદપ્રપૂરે શ્રુતિપથપતિતે પ્રેષ્ઠગોપાલબાલ-
ધેન્વઃ કૃષ્ટાન્તરઙ્ગા યદુપતિનિકટં પ્રત્યધાવન્ પ્રહર્ષાત્ ।
ઉત્પુચ્છાસ્સત્વરાસ્તા મુરલિમધુરવાનન્દમગ્નાઃ પ્રકામં
ધ્યાનામીલદૃ(દૃ?)શસ્તત્પદકમલપુટં યોગિચર્યાઃ સમીયુઃ ॥ ૧૧૯॥

ગાનાનન્દે નિમગ્ના વનચરનિવહા સ્થાવરા જઙ્ગમા વા
જીવાસ્સાફલ્યમીયુર્જનિકૃતમખિલં કશ્મલં તત્યજુશ્ચ ।
ક્ષુત્તૃટ્કામાનુપેતાઃ પરમસુખસુધામ્ભોધિમગ્નાઃ પરસ્ય
પુંસઃ શ્રીવેણુનાદામૃતજલદભવે વલ્લવીભાગધેયે ॥ ૧૨૦॥

સિદ્ધાસ્સાધ્યાસ્સુરૌઘા મુનિજનનિવહાઃ શ્રીમદાભીરનારી-
જારોદ્ગીતાતિધીરશ્રુતિમધુરમધુસ્યન્દિવેણુપ્રણાદે ।
મગ્ના લગ્નાશ્ચ લીના વનભુવિ યમુનાતીરપુણ્યપ્રદેશે-
ષ્વેકો વા સ્યાં તૃણોઽપીત્યથ હૃદિ નિતરાં મેનિરે ભાગ્યમેતત્ ॥ ૧૨૧॥

સ્પૃષ્ટે ભાણ્ડે પરેણ સ્વનમુખરચલચ્છિક્યસંસક્તખણ્ડા-
સન્નાદોદ્બુદ્ધગોપ્યાસ્સચકિતનયનપ્રેક્ષણીયોરુભીતિમ્ ।
બદ્ધ્વા પાશૈર્નયન્ત્યા પથિ તમનુયયુર્વેશ્મ નન્દસ્ય યાતાઃ
દૃષ્ટ્વા વેણું ક્વણન્તં ચિરમથ નિભૃતાસ્તસ્થુરત્યદ્ભુતેન ॥ ૧૨૨॥

દેવ શ્રીઘોષનારીરમણ મધુપતે મામકાભ્યર્થનાં ત્વં
કારુણ્યાચ્છ્રોતુમર્હસ્યખિલગુણનિધે કર્તુમપ્યર્હસીશ ।
પાપિષ્ઠોઽહં તથાપિ પ્રણતજનકૃપાસાગરાનાથબન્ધો
દીનં માં વેણુનાદામૃતસરસિ સુખં સ્નાપય શ્રીમુકુન્દ ॥ ૧૨૩॥

આપદ્બન્ધો પ્રણષ્ટં નિરવધિદુરિતધ્વાન્તદુર્દાન્તભૂમિં
ત્રાયસ્વાકર્ણયેશ પ્રરુદિતગદિતં પ્રાર્થયે પાર્થબન્ધો ।
છિન્દીમં ભિન્દિચેતિ પ્રકટકટુગિરા ભર્ત્સ્યમાને કૃતાન્ત-

દૂતાપાતેઽન્તકાલે મણિમુરલિરવાનન્દનેનાશુ પાહિ ॥ ૧૨૪॥

નાદં વાઽઽકર્ણયેયં મધુમુરલિગલદ્ગાનમાધુર્યધામ
સાન્દ્રાનન્દામૃતોદં સકૃદપિ કલનાચ્છ્રોત્રમાત્રેણ ભવ્યમ્ ।
પશ્યેયં ભાગ્યયોગાત્કિમુ પરમહસો વાસુદેવસ્ય લીલા-
રઙ્ગં વૃન્દાવનં વા હરિમણિમહસં ચાપિ વેણું ક્વણન્તમ્ ॥ ૧૨૫॥

શ્યામાઙ્ગાન્મારકોટિજ્વલદતુલલસત્સારલાવણ્યપૂરાત્
શિઞ્જાના મઞ્જુરત્નપ્રકરવિલસિતશ્રીપદામ્ભોજયુગ્માત્ ।
દેવાન્મોદાત્કરાબ્જોદ્ધૃતલલિતસુતામ્રોષ્ઠવિન્યસ્તવેણુ-
ગાનાદાભીરનારીસુકૃતસમુદયાદ્દેવમન્યં ન જાને ॥ ૧૨૬॥

આર્તત્રાણપરાયણાખિલગુરો ત્વામર્થયેઽહં પુનઃ
પાપૈકાવસતિર્મુહુઃ કલિલતાં પ્રાપ્તો નિરાશોઽવશઃ ।
કણ્ઠાસ્કન્દિકફાદિદોષનિચયો પ્રોચ્ચણ્ડદણ્ડાયુધ-
પ્રેષ્યાભર્ત્સનતાડનાદિવિકલે માં પાહિ વેણુસ્વનાત્ ॥ ૧૨૭॥

પ્રાણાપાયદશોપયાતયમરાડુચ્ચણ્ડદૂતાર્દિતે
કાલે સંવૃતબન્ધુમિત્રરુદિતપ્રાયે મહાદીતિદે ।
અશ્રુવ્યાકુલલોચનોઘનિચયં સ્મૃત્વાહિતં નાચરન્
દીનોઽયં નનુ યાદવેન્દ્રમુરલીગાનેન સન્તોષ્યતામ્ ॥ ૧૨૮॥

પશ્યેયં વા કદાહં નવઘનસુભગં પીતકૌશેયવાસં
શ્રીવત્સાઙ્કં સુહારં પદધૃતવિરણન્મઞ્જુમઞ્જીરરમ્યમ્ ।
ગોપાલં કૌસ્તુભશ્રીયુતરુચિરમહાવક્ષસં સ્વક્ષમીશં
ધન્યશ્રીવન્યમાલાધરમહમનિશં વેણુગાનૈકલોલમ્ ॥ ૧૨૯॥

ગાયન્ વેણું કનકરશનાદામદીપ્યત્કટિશ્રી-
ભાસ્વદ્ધેમામ્બરસુલલિતો નીલમેઘાભિરામઃ ।
નૃત્યન્તાલક્રમમનુસરન્ વિક્ષિપન્ પાદપદ્મે
ભાયાદાયાન્મમ તુ પુરતઃ વલ્લવીભાગ્યરત્નમ્ ॥ ૧૩૦॥

નાહં પ્રીયે સુરપતિપદાવાપ્તિમૈશ્વર્યસિદ્ધિં
સામ્રાજ્યં વા નિખિલમપિ વા ભોગયોગં મુરારે ।
પ્રીયે હ્રીયે મુહુરપિ વિભો સાન્દ્રનાદામૃતોદ-
વંશીનાદે મહતિ સરિતિ સ્નાનમાનન્દરૂપમ્ ॥ ૧૩૧॥

મન્દં મન્દં પદકમલકે વિક્ષિપન્ ચારુવેણુ-
    ગાનં કુર્વન્નનુ ચ મધુરં મોદયન્ માં વ્રજેશઃ ।
આગચ્છેદ્ધા દુરિતનિચયં ભઞ્જયન્નઞ્જનાભઃ
    સૌધીમક્ષ્ણોઃ કિમુ સ વિતરેદ્વૃષ્ટિમાનન્દરૂપામ્ ॥ ૧૩૨॥

યાવજ્જીવં મુરલ્યા મધુમયસરસાનન્દગાનામૃતોદા-
    સારેણાસિક્તકર્ણઃ કિમુ હૃદિકમલે દેવદેવં વરેણ્યમ્ ।
ધ્યાત્વાખણ્ડપ્રમોદં નિરતિશયમહો કિન્નુ લપ્સ્યે કૃપાબ્ધે
    છિત્વા નિશ્શેષતાપપ્રકરમહમહો ત્વત્પદે કિન્નુ યુઞ્જ્યામ્ ॥ ૧૩૩॥

પાદાબ્જાન્નિસ્સરન્તી સગરસુતગતિપ્રેષ્ટસોપાનપઙ્ક્તિઃ
    ગઙ્ગા ભાગીરથીતિ ત્રિજગતિ વિદિતા પાપહન્ત્રી નરાણામ્ ।
નાદાખ્યેયં તુ ગઙ્ગા વ્રજયુવતિજનપ્રેમપાત્રામ્બુજાત-
    વક્ત્રપ્રોતાર્યવેણુસ્રવદમૃતરસા મોક્ષદા ભાતિ હૃદ્યા ॥ ૧૩૪॥

(વક્ત્રપદ્મોન્નીતાર્યવેણુક્વણિતમધુઝરી મોક્ષદા ભાતિ હૃદ્યા)
કારુણ્યાબ્ધે મુરારે મુરલિનિનદ ભો ત્વામહં નૌમિ સાક્ષા-
    ન્નાદજ્યોતિસ્સ્વરૂપં સકલમુનિમનોધ્યાનગમ્યં સુસૂક્ષ્મમ્ ।
દેવ ત્વા મૂર્તમન્તર્મમ હૃદિ કુતુકાન્મૂર્તિમાકલ્પ્ય લીલા-
    લોલં મોદામ્બુરાશિં પરસુખનિલયં ધારયામ્યાદરેણ ॥ ૧૩૪॥

પાયં પાયં ન તૃપ્યામ્યતિમધુરતયા દેવ તે વેણુગીત-
    નાદાનન્દામૃતામ્ભઃશ્રવણપુટભૃતં સ્વાદુ નઃ સ્વાદુ ભૂરિ ।
તદ્ભો ગોવિન્દ મોહાદુરિતશતકૃતોઽપ્યસ્ય નાદેઽતિભક્તિ-
    ર્ભૂયાત્કારુણ્યસિન્ધો શરણદ ભગવન્ જન્મજન્માન્તરેષુ ॥ ૧૩૫॥

ગાયન્તં વેણુમુચ્ચૈર્ઘનરુચિમમલં સૂર્યકોટિપ્રકાશં
    નૃત્યન્તં નર્તયન્તં પદકમલરણન્મઞ્જુમઞ્જીરઘોષમ્ ।
આયાન્તં મા બિભીહિ ત્યજ મનસિ રુજં સોઽહમસ્મ્યભ્યુપેત
    ઇત્યેવં માં ગદન્તં યદુકુલતિલકં કિં કદા વા નિરીક્ષે ॥ ૧૩૬॥

અજ્ઞોઽહં તે ગુણાનામણુમપિ નિતરામ્મન્તુમીશો ન ચાસ્મિ
    બોદ્ધું વક્તું ચ દેવિ શ્રિતસકલજનત્રાણદીક્ષે નમસ્તે ।
ક્ષન્તવ્યં સાહસં મે નિરુપધિકરુણે દીનદીનસ્ય માતઃ
    સાન્દ્રાનન્દાવબોધે યદુપતિમુરલીનાદધારે નમસ્તે ॥ ૧૩૭॥

નમસ્તે પીયૂષપ્રિય મધુરસૌભાગ્યવિભવે

ચિરાત્પુણ્યૈર્લભ્યે મયિ કુરુ કૃપામમ્બ સદયે ।
પુરસ્તે પશ્ચાત્તે સ્વરમયિ નમઃ પાર્શ્વત ઇદં
કૃતં ચોર્ધ્વં માતઃ કલમુરલિકાનાદલહરિ ॥ ૧૩૮॥

મુકુન્દાખણ્ડેન્દુપ્રતિમવદનાહં તવ વિભો
સુધાધારાહૃદ્યાં તવ મુરલિકાનાદલહરીમ્ ।
દુરન્તામલ્પજ્ઞઃ કિમપિ કણમાત્રં ગદિતવાન્
ક્ષમસ્વાગાંસ્યસ્ય શ્રિતચરણપદ્મ દયયા ॥ ૧૩૯॥

કિમપિ વચનમીષદ્વક્તુકામઃ પરસ્ય
પ્રિયમુરલિનિનાદાનન્દધારાપ્રભાવે ।
અકરવમિદમસ્મિન્ દોષપઙ્કં પ્રમૃજ્ય
પ્રિયજનપરિદત્તં સ્વીકુરુષ્વામરેડ્ય ॥ ૧૪૦॥

આભીરવારનારીજારસ્યામન્દમુરલિનિનદં મે
મોદં સદા દદાતુ ગીતરવાશ્લિષ્ટમોહનનિનાદમ્ ॥ ૧૪૧॥

બાલા વૃદ્ધાસ્સકલમપિ ગોકુલં યસ્ય નાથ-
સ્યાકર્ણ્ય દ્રાગમૃતમધુરં વેણુગાનં મનોજ્ઞમ્ ।
પ્રાપુઃ પ્રેમ્ણા સકલજગતાં નાયકસ્યાભિરામ-
પાદામ્ભોજં વિવશહૃદયાસ્ત્યક્તકાર્યપ્રપઞ્ચાઃ ॥ ૧૪૨॥

વેણું ક્વણન્તં ગોપાલબાલમાનન્દવિગ્રહમ્ ।
નમામિ જગતામ્મૂલં મુકુન્દમખિલેશ્વરમ્ ॥ ૧૪૩॥

મુરલીમધુરધ્વાનમધુનિષ્યન્દદાયિને ।
મુરલીનાદધારાખ્યામર્પયામિ મધુદ્વિષે ॥ ૧૪૪॥

રચિતં સુબ્બરામાખ્યદ્વિજેન ભક્તિપૂર્વકમ્ ।
મુરલીધરપ્રીત્યર્થં તદઙ્ઘ્રિષુ સમર્પિતમ્ ॥ ૧૪૫॥

ઇતિ મુરલીનાદધારાસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proforead by PSA Easwaran psaweswaran at gmail.com

*Murali Nadadhara Stotram*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*